# संस्कृत-वार्ता:

दिनाङ्क :- 14.06.2025
प्रातः :- 06:55

## ईरान-इजराइल-आक्रमणम्

ईरान देशेन गतरात्रौ इजरायल देशं विरूध्य प्रत्युत्तरे आक्रमणं विहितम्। आक्रमणे इजरायल देशस्य नगरेषु शताधिक-प्रक्षेप्यस्त्राणि ड्रोन इति च क्षेपितानि। तेहरानेन इदम् ऑपरेशन-सीवियर-पनिशमेंट इति प्रोक्तम्। तेल अवीव यरूशलम इत्यत्र विस्फोट-कारणेन इजरायल देशेन वायवीय-संचेतना प्रसारिता। जना: आश्रयस्थलेषु गन्तुं प्रोक्ता:। अवेधयमस्ति यत् ईरान देशेन एतत् आक्रमणम् इजरायल देशस्य बृहत्तम-सैन्य-कार्याचरणस्य कतिपय होरा: अनन्तरम् एव कृतम्। इजरायल देशस्य आक्रमणे ईरान राष्ट्रस्य परमाणु केन्द्राणि शीर्ष सैन्याधिकारिण: च निहता:। उभयो: देशयो: युद्धेन नागरिका: प्रभाविता: सन्ति।

## प्रधानमन्त्री इजराइल

प्रधानमन्त्रिणे नरेन्द्रमोदिने गतदिने इजराइल देशस्य प्रधानमन्त्रिणा बेंजामिन नेतन्याहू इत्यमुना दूरभाषे पश्चिम-एशियायाम् उदीयमान-स्थितेः विषये विवरणं प्रदत्तम्। सोशल मीडिया पोस्ट इत्यत्र श्रीमोदिना उक्तं यत् अमुना विषयस्मिन् भारतस्य विचाराः प्रकटिता:। क्षेत्रे शान्तिं स्थिरतां च शीघ्रं स्थापयितुं बलं प्रदत्तम्। विदेशमन्त्री डॉ. एस जयशङ्करः इजराइल-देशस्य विदेशमन्त्रिणा गिदोन सार इत्यमुना सह वर्तमान- घटनाक्रमस्य विषये संवादम् अकरोत्। सममेव विदेशमन्त्री डॉ. एस जयशङ्करः ईरान-देशस्य विदेशमन्त्रिणा सैय्यद अब्बास अरागची इत्युना साकम् अपि विषयेस्मिन् संवादम् अकरोत्।

## पुरी भारते ऊर्जा

केन्द्रीय पेट्रोलियम प्राकृतिक गैस इति वालीन्धन मन्त्री हरदीपसिंह पुरी अवोचत् यत् देशे आगामिभ्य: मासेभ्य: ऊर्जस: पर्याप्ता आपूर्ति: वर्तते। तेन पेट्रोलियम -सचिव इत्यमुना भारतीयोर्जस: सार्वजनिक-क्षेत्राणाम् उपक्रमप्रमुखै: च साकम् उपवेशनस्य अनन्तरं सोशल-मीडिया-पोस्ट इत्यत्र विवरणं प्रदत्तम्। अवधेयं यत् तैलापूर्ति-विषये स्पष्टीकरणम् महत्वपूर्णम् अस्ति। यतोहि गतदिने ईरान देशे इजराइल-द्वारा आक्रमणस्य अनन्तरं तैल-मूल्ये वृद्धि:जाता।

## नागरिविमाननमाहानिदेशालयः

डी.जी.सी.ए. इति नागरिक-विमानन-महानिदेशालयेन अहमदाबादे विमान-दुर्घटनायाः अनन्तरं निवारकोपायरूपेण जेन.एक्स.इंजन इत्यनेन युक्तानां लैस बोइंग 787-8 अथ 787-9 ड्रीमलाइनर इत्येषां विमानानाम् अतिरिक्त-सुरक्षा-निरीक्षणाय एयर-इण्डिया-समवायः निर्देशितः।

डी.जी.सी.ए. इत्यनेन उक्तं यत् सम्बन्धित-क्षेत्रीय- कार्यालयैः सह समन्वयं विधाय तत्काल-प्रभावेण निरीक्षणं कर्तव्यम्। एकस्मिन् वक्तव्ये डी.जी.सी.ए. इत्यनेन प्रोक्तं यत् विमानस्य प्रस्थानात् पूर्वं सर्वविधं निरीक्षणम् आवश्यकम् भविष्यति।

भारतीय चिकित्सासङ्घः

भारतीय चिकित्सा-सङ्घस्य गुजरातस्य अध्यक्षः मेहुल शाहः अवोचत् यत् अहमदाबादे विमानदुर्घटनायां चिकित्सक-छात्रावासे चत्वारः छात्राः एकस्य चिकित्सकस्य भार्या च मृत्युम् उपगताः। तेनोक्तं यत् व्रणितानाम् उपचाराय शताधिकाः चिकित्साः घटनास्थले चिकित्सालयेषु सेवारताः सन्ति। तेन इदमपि उक्तं यत् छात्रावास-क्षेत्रे पञ्चचत्वादिंशत् चिकित्सक-छात्राः संरक्षिताः।

आयुषमन्त्रालयः

आयुषमन्त्रालयः अद्य नव-दिल्ल्यां एक-पृथ्व्यै एक-स्वास्थ्याय योगाधारितस्य हाइब्रिड वैश्विक-शिखर-सम्मेलन-योग-कनेक्ट इत्यस्य आयोजनं करिष्यति। इदं सम्मेलनम् अन्ताराष्ट्रिय-योग-दिवसात् पूर्वं प्रमुख-कार्यक्रमस्य रूपेण आयोज्यते।

आई.एस.एस.एफ.शूटिंग

शूटिंग इति क्रीडायां भारतस्य सुरूचि-सिंहः महिलानां 10 मीटर-एयर पिस्टल इति श्रेण्यां स्वर्णपदम् प्राप्तवती। तया फ्रांस देशीया क्रीडिका पराजिता। आई.एस.एस.एफ.शूटिंग इति स्पर्धामालिकायाम् एतत् हि सरूचेः तृतीयं पदकं वर्तते।

हॉकी

एफ.आई.एच. हॉकी प्रो लीग इति स्पर्धायाम् अद्य भारतस्य महिलादलं पुरूषदलं च क्रीडिष्यतः। भारतीय पुरूषदलम् ऑस्ट्रेलिया दलेन सह क्रीडिष्यति। एषा स्पर्धा मध्याह्ने द्विवादने आरप्स्यते। महिला दलं अपि आस्ट्रेलिया दलेन सह क्रीडिष्यति। इयं स्पर्धा सायं सार्ध पञ्चवादने प्रारप्स्यते।

क्रिकेट्

डब्ल्यू.टी.सी. इति क्रिकेट् स्पर्धायां दक्षिण अफ्रीका दलं विजयं प्रति अग्रेसरं वर्तते। अद्य चतुर्थे दिने दक्षिणाफ्रिकादलाय विजय-प्राप्तये नवषष्टि-धावनाङ्कानाम् आवश्यकता वर्तते। तृतीय दिने क्रीडावसानं यावत् दक्षिण अफ्रीका दलेन क्रीडक-द्वयस्य हानौ त्रयोदशोत्तरद्विशतं धावनाङ्काः निर्मिताः। इतः पूर्वम् ऑस्ट्रेलिया दलेन द्वितीय-पर्याये सप्तोत्तरद्विशतम् धावनाङ्काः निर्मिताः।

इतिवार्ताः